गुरुपादुकापञ्चकम्

{॥ गुरुपादुकापञ्चकम् ॥}

जगज्जनि-स्तेम-लयालयाभ्यां अगण्य-पुण्योदय-भाविताभ्याम्।

त्रयीशिरोजात-निवेदिताभ्यां नमो नमः श्रीगुरुपादुकाभ्यम्॥१॥

विपत्तमस्तोम-विकर्तनाभ्यां विशिष्ट-संपत्ति-विवर्धनाभ्याम्।

नमज्जनाशेष-विशेषदाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम्॥२॥

समस्त-दुस्तर्क-कलङ्क-पङ्कापनोदन-प्रौढ-जलाशयाभ्याम्।

निराश्रयाभ्यां निखिलाश्रयाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम्॥३॥

तापत्रयादित्य-करार्दितानां छायामयीभ्यां अतिशीतलाभ्याम्।

आपन्न-संरक्षण-दीक्षिताभ्यां नमो नमः श्रीगुरुपादुकाभ्याम्॥४॥

यतो गिरोऽप्राप्य धिया समस्ता ह्रिया निवृत्ताः सममेव नित्याः।

ताभ्यामजेशाच्युत-भाविताभ्यां नमो नमः श्रीगुरुपादुकाभ्याम्॥५॥

ये पादुका-पञ्चकमादरेण पठन्ति नित्यं प्रयताः प्रभाते।

तेषां गृहे नित्य-निवासशीला श्रीदेशिकेन्द्रस्य कटाक्षलक्ष्मीः॥६॥

Stotram Digitalized By Sanskritdocuments.org

Encoded and proofread by N.Balasubramanian bbalun@dataone.in

Please send corrections to sanskrit@cheerful.com

Last updated ृoday

http://sanskritdocuments.org

Guru Paduka Panchakam Lyrics in Devanagari PDF
% File name : gurupAdukApanchaka.itx
% Category : panchaka
% Location : doc_deities_misc
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : N.Balasubramanian bbalun at dataone.in
% Proofread by : N.Balasubramanian bbalun at dataone.in
% Latest update : March 29, 2009
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website